10 50 स्तोत्र गोविंददामोदर पत्र - 3

॥श्रीमतेरामानुजायनमः॥ ॐ श्रीकृष्णवि
ष्णो मधुकैटभारे भक्तानुकंपिन् भगव
न्मुरारे त्रायस्वमां केशवलोकनाथ
गोविंददामोदरमाधवेति १ अग्रेकुरू
णामथपांडवानां दुःशासनेनाहृत
वस्त्रकेशा कृष्णा तदाक्रोशदनन्यना
था गोविंददामोदरमाधवेति २ वि
क्रेतुकामा किलगोपकन्या मुरारि
पादार्पितचित्तवृत्तिः दध्यादिकंमोह
वशादवोचद् गोविंददा ३ उलूखले
संभृततंडुलानि संघट्टयंत्यो मुशलैः
प्रमुग्धा गायंतिगोप्योजनितानुरागा
गोविंददा ४ काचित्करांभोजपुटे नि
षण्णं क्रीडाशुकं किंशुकरक्ततुंडं अ
ध्यापयामास सरोरुहाक्षी गोविंद ५
गृहेगृहे गोपवधूसमूहः प्रत्यद्दयं पंज

6'50" X 4'50"

रश्मारिकाणां मवलङ्गिरंवाचयितुंप्रह

तोगोविंद ६ पर्य्यंकिकाभाजमलंकु

मारं प्रलापयंत्यो किलगोपकन्या ज

गुप्रबंधं सरलानंनेभं गोविंद ७ रामा

नुजं वीक्षणकेलिलोलं गोपीगृहीत्वा

नवनीतचौरं अवालकं वालकमाजु

हाव गोविंद ८ रामानुजं विक्षणके

लिलोलं गोपीगृहीत्वानवनीतचौरं

अवालकं वालकमाजुहाव गोविंद

अंकाधिरूढं शिशुगोपमूढं स्तनंधरं

तं कमलैककोलं संबोधयामासमु

दायसोदा गोविंद ९ क्रीडंतमंतर्ज

लमात्मजं स्वं समंवयस्यैः पशुपाल

वालैः प्रेमणायशोदाप्रजुहावकृष्णं

गोविंद १० यशोदयागाढमलूष

लेन गोकंठपाशेन निवध्यमानः रु

रोदमंदं नवनीतचोरं गोविंद ११ नि
जांगणे कंकणकेलिलोलं गोपीगृ
हीत्वा नवनीतगोलं संमर्दयत्पाणित
लेन नेत्रे गोविंद १२ गृहे गृहे गोपवधू
कदंबाः सर्वे मिलित्वा समवाययोगे
पुण्यानि नामानि पठंति नित्यं गोविंद
१३ मंदारमूले वदनाभिरामं बिंबाधरा
पूरितवेणुनादं गोगोपगोपीजनम
ध्यसंस्थं गोविंद १४ उत्थाय गोप्यो
पररात्रकाले स्मृत्वा यशोदासुतबाल
केलिं गायंति काले दधिमंथयंतो गोवि
द १५ जग्धोथदत्तो नवनीतपिंडो गृहे
यशोदा विचिकित्सयेति उवाच सत्यं
वद हे मुरारे गोविंद १६ कश्चित्प्रभाते
दधिपूर्णपात्रे निक्षिप्यमंथं युवतिर्मुकुं

४

दं आलोक्य गानं विवशं करोति गो
विंदः १७ क्रीडापरं भोजन मज्जनार्थं
हितैषिणि स्त्री ततु जं यशोदा आजो
ह वीत्प्रेम मपरी स्नुताक्षी गोविंद १८
सुखं शयानं निलये न विष्णुं देवर्षि
मार्ये मुनयः प्रपन्ना ते नाच्युतं लभ
यंतां भजंति गोविंद १९ विहाय नि
द्रामरुणोदयेच विहाय कृत्यानि च
वित्तमुख्या वेदावसानं प्रपठंति
नित्यं गोविंद ॥२०॥ वृंदावने गोपगणं
सगोपी विलोक्य गोविंद वियोग
खिन्नां राधां प्रकंपोत्फुल्ललोचना
न्या गोविंद ॥२१॥ प्रभात संचारगता
तु गाव ... दुहणार्थं नतयोयशोदा
प्रबोधयत्पाणि तलेन मंदं गोविंद

२१ प्रभातसंचारगता नु गावस्तद्रक्ष
णार्थं तनयं यशोदा प्रबोधयत्पाणि
तलेन मंदं गोविंद २२ प्रवालशोभाइ
व दीर्घकेशा वातांबुपर्णाशनपूत
देहा मूले तरूणां मुनयो वदंति गो
विंद २३ गोपी कदाचिन्मणिपंजरस्थं
शुकं वचो वाचयितुं प्रवृत्ता कंदर्पता
तेति यदा करोति गोविंद० २४ एवं
ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः
कृष्णविषक्तमानसाः विसृज्य ल
ज्जां रुरुदुः सुस्वरं गोविंद ॥२५॥ गो
वत्सबालैः शिशुकाकपक्षं बध्नंतमं
भोजदलायताक्षं उवाच माता चि
बुकं गृहीत्वा गोविंद० २६ प्रभातका
ले वरवल्लवौघा गोरक्षणार्थं धृतवे

नदंडाः आकारयामासुरनंतमाद्यं गोविंद० २७ जलाशयेकालियमर्द्दनाय: यदाकदंबादपतत्कुमारि गोपांगना। श्चुक्रुशुरेत्यगोपीगोविंद० २८ सरोवरेकालियनागबद्धं शिशुंयशोदातनयंनिशम्य कोशुर्लुठंत:पथिगोपबालागोविंद० २९ अक्रूरमासाद्ययदामुकुंद श्चापोत्सवार्थं मथुरांप्रविष्टः तदासपौरैर्जयतीत्यभाषिगोविंद: ३० कंसस्यदूतेनयदैवनीतै वृंदावनांतांवसदेवसूनौ रुरोदगोपीभवनस्यमध्ये गोविंद ३१ अक्रूरसुतं यदुवंशनाथं संगह्यमानं मथुरांनिरीक्ष्य अवैर्नियोगात्किल गोपबालागोविंद ३२ चकंदगोपीनलनीलवनांते कृष्णेनहीनाकुसुमे

२।६।

श्यामा प्रफुल्ल नीलोत्पल लोचना
भ्यां गोविंद २३ मातापितृभ्यां परि
वार्यमाना गृहे प्रविष्टा विललाप गोपी
आगत्य मां पालय विश्वनाथ गोविंद
२४ वृंदावनस्थं हरिमाशु बुद्ध्वा गोपी
गता कापि वनं निशायां तत्रापि दृ
ष्ट्वा तिमयादरोदीद् गोविंद २५ सुखं
शयाना निलये च निजे पि नामानि
विष्णोः प्रवदंति मर्त्या तेनैश्चितं तन्म
यतां व्रजंति गोविंद० २६ सानीर
जाक्षीमवलोक्य राधां रुरोद गोविं
दवियोगखिन्ना सखी प्रफुल्लोत्प
ललोचनाभ्यां गोविंद २७ जिह्वे र
सज्ञे मधुरप्रियात्वं सत्यं हितं त्वां पर
मं वदामि आवर्णयेथा मधुराक्षरा
णि गोविंद २८ आत्यंतिकं व्या

धिहरंजनानां चिकित्सकंवेदवि
दोवदंति संसारतापत्रयनाशनी
जं गोविंद ३९ नानाज्ञायागव्व
तिरामनदे सलक्ष्मणेरण्यप्रिशेस
मीते चकंदरांमसानिजाजनित्री
गोविंद० ४० एकाकिनीदंडकक्वी
नन्तान मीत्सायमानादशकंधरे
ण सीतानदाकंदनम्पनाथ्या:
गोविंद ४१ रामारिसुक्का जनका
त्मजासा विचिंतयंतीहदिरांमरूपं
त्रस्तोदसीतारघुनाथपाही गोविंद:
४२ प्रसीदविश्वारघुवंशनाथ सुरा
सुराणां सुखदु:खहेतो रुरावसीता
सुसमुद्रमध्ये गोविंद ४३ अंतर्जले
ग्राहग्रहीतपादो विसृष्टविक्लिन्नस
मस्तबंधु तदागजेंद्रो नितरांजगाद

गोविंद ४४ हंसध्वजः शंखचइलो

ददर्श पुत्रं कटाहे प्रतप्तं नमेनं पुण्या

नि नामानि हरेजपंतं ४५ गोविंद०

दुर्वाससोवाक्यं परिगृह्य कृष्णा मा

याऽन्विता काननवासमीसं छन्नः प्रवि

ष्टा मनसाऽनुहाव गोविंददा ४६ ध्येयं

सदायोगिभिरप्रमेयं चिंताहरंचिंति

तपारिजातं कस्तुरिकाकल्पितनील

वर्णं गोविंद ४७ संसारकूपेपतितोऽत्य

गाधे मोहांधपूर्णे विषयाभितप्ते क

रावलंबं ममदेहिविष्णो गोविंद० ४८

त्वामेव याचे ममदेहि जिह्वे समागते

दंडधरे कृतांते वक्तव्यमेवं मधुरंभव

त्या गोविंद० ४९ भजस्वमंत्रंमेव

बंधमुक्तै जिह्वे रसज्ञेसुलभं मनो

ॐ हे पाद्य नाद्येमुनिभिजनं ॥ गो
विंद ॥ ५० ॥ जिह्वे सदैवं भज सुंदर
राणि नामानि कृष्णस्य मनोहराणि
गोविंद केशव मुकुंद हरे मुरारे ॥ ल
क्ष्मीनिवास मधुसूदन माधवेति ॥
५१ गोविंद गोविंद हरे मुरारे ॥ गोविं
द गोविंद मुकुंद कृष्ण गोविंद गोवि
द मुकुंद कृष्ण गोविंद ॥ ५२ ॥ सुखाव
साने इदमेव सारं दुःखावसाने इद
मेव ज्ञेयं देहावसाने इदमेव जाप्यं
गोविंद दामोदर माधवेति ॥ ५३ ॥ इ
ति श्रीमत्वल्लभाचार्यकृतं गो
विंददामोदरस्तोत्रं संपूर्णं २ शुभं ॥